सख यतेः क्विप् सखीः, [1]तस्य ङसिङसोः सख्युः इति[2]। तीशब्दस्यापि[3] – लूनमिच्छति लूनीयति,[4] लूनीयतेः क्विपि लुप्ते, लून्युरागच्छति। लून्युः स्वम्[5]। निष्ठानत्वं (८.२.४४/३०१८) 'पूर्वत्रासिद्धम्' (८.२.१/१२) इत्यसिद्धम्। विकृतनिर्देशादेव इह न भवति, अतिसखेरागच्छति, सेनापतेरागच्छति [6]इति। सखिशब्दस्य केवलस्य घिसञ्ज्ञा प्रतिषिध्यते (१.४.७/२४३), न तदन्तस्य ॥

## अतो रोरप्लुतादप्लुते। (११३/१७३)

अति,[7] उत् इति वर्तते। अकारादप्लुतादुत्तरस्य रो रेफस्य उकारानुबन्धविशिष्टस्य अकारेऽप्लुते परत उकारादेशो भवति। वृक्षोऽत्र। प्लक्षोऽत्र। 'भोभगोअघोअपूर्वस्य योऽशि' (८.३.१७/१६७) [8]इत्यस्मिन् प्राप्ते उत्वं विधीयते। [9]रुत्वमपि आश्रयात् 'पूर्वत्रासिद्धम्' (८.२.१/१२) इति [10]असिद्धं न भवति। अतः इति किम्? अग्निरत्र। तपरकरणं किम्? वृक्षा अत्र। [11]सानुबन्धग्रहणं किम्? स्वरत्र। प्रातरत्र[12]। अति इत्येव, वृक्ष इह। तस्यापि तपरत्वादत्र न भवति। वृक्ष आश्रितः। अप्लुतात् इति किम्? सुस्रोता३ अत्र न्वसि। अप्लुते इति किम्? तिष्ठतु पय अ३श्विन्। अत्र प्लुतस्यासिद्धत्वात् उत्वं प्राप्नोति इति अप्लुताद-प्लुते इति उच्यते ॥

## हशि च। (११४/१६६)

हशि [13]च परतः अत उत्तरस्य रोरुकारादेशो भवति। [14]पुरुषो याति। पुरुषो हसति। पुरुषो ददाति ॥

## प्रकृत्याऽन्तःपादमव्यपरे। (११५/३५१८)

[15]एङोऽति (६.१.१०९/८६) इत्येव। एङः इति यत् पञ्चम्यन्तमनुवर्तते, तदर्थादिह प्रथमान्तं [16]भवति। प्रकृतिः [17]इति स्वभावः कारणं वाऽभिधीयते। अन्तर् इति अव्ययमधिकरणभूतं मध्यमाचष्टे। [18]पादशब्देन [19]च ऋक्पादस्यैव ग्रहण[20]मिष्यते, न तु श्लोकपादस्य। [21]अवकारयकारपरे अति परतः एङ् प्रकृत्या भवति। स्व-भावेनावतिष्ठते कारणात्मना वा भवति, न विकारमापद्यते। तौ चेन्निमित्तकार्यिणौ अन्तःपादमृक्पादमध्ये भवतः। 'ते अग्रे अश्वमायुञ्जन्' (वा. सं. ९.७)। 'ते अस्मिञ्जवमादधुः' (वा. सं. ९.७)। 'उपप्रयन्तो अध्वरम्' (ऋ. १.७४.१)। 'शिरो अपश्यम्' (ऋ. १.१६३.६) 'सुजाते अश्वसूनृते' (ऋ. ५.७९.१)। 'अध्वर्यो अद्रिभिः सुतम्' (ऋ. ९.५१.१)। अन्तःपादम् इति किम्[22]? 'कया मती कुत एतास एतेऽर्चन्ति' (ऋ. १.१६५.१)। अव्यपरे इति किम्? 'तेऽवदन्' (ऋ. १०.१०९.१)। तेजोऽप्रस्मयम्' (वा. सं. १२.६३)। एङः इति [23]किम्? 'अन्वग्निरुषसामग्रमख्यत्' (अ. वे. ७.८२.४)।

केचिदिदं सूत्रं नान्तःपादम[24]व्यपरे इति पठन्ति, ते संहितायामिह यदुच्यते तस्य सर्वस्य प्रतिषेधं वर्णयन्ति ॥

---

1. तत्र फ. 2. भवति इत्यधिकम् फ. 3. उदाहरणम् इत्यधिकम् फ. 4. ततः क्विप् इत्यधिकम् फ. 5. इति इत्यधिकम् फ. 6. इति नास्ति फ. 7 इति इत्यधिकम् फ. 8. इत्येतस्मिन् क. 9. रुत्वविधानात् क. ह, आश्रयभूतत्वात् फ. 10. असिद्धत्वं फ. 11. उकारानुबन्धग्रहणं ग. 12. सुभोजनम् इत्यधिकम् क. 13. च नास्ति ग. फ. 14. हस्ती ह. 15. वाक्यमिदं नास्ति ग. फ. 16. आस्ते क. 17. इति नास्ति ग. ह. 18. पदशब्देन क. 19. अपि फ. 20. विद्यते ग. 21. अवकारपरे अयकारपरे क. फ. ह. 22. कार्यम् इत्यधिकम् क. ह. 23. किमर्थम् क. फ. 24. अव्यपरे नास्ति फ.